# natopadeshastotram

# નતોપદેશસ્તોત્રમ્

## Document Information

Text title : natopadeshastotram

File name : natopadeshastotram.itx

Category : deities_misc

Location : doc_deities_misc

Transliterated by : PSA Easwaran

Proofread by : PSA Easwaran

Description-comments : Devi book stall, Kodumgallur, Kerala

Source : Sthothra Rathnaakaram, edited by N. Bappuravu, 2010

Latest update : August 6, 2016

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

February 3, 2023

*sanskritdocuments.org*

# નતોપદેશસ્તોત્રમ્

મનઃ સમાધૌ પરમાર્થરઙ્ગં વિધાય નિષ્પન્દમનુત્તરઙ્ગમ્ ।
બુધા વિધાતું ભવભીતિભઙ્ગં વિભું ભજધ્વં ગિરિજાભુજઙ્ગમ્ ॥ ૧॥

પાશ્યાવશેનેવ મહાવિહઙ્ગં વલ્ગાબલેનેવ મહાતુરઙ્ગમ્ ।
નિરુધ્ય યોગેન મનઃપ્લવઙ્ગં વિભું ભજધ્વં ગિરિજાભુજઙ્ગમ્ ॥ ૨॥

મન્ત્રૌષધાદિક્રિયયા ભુજઙ્ગં યથા તથા વાગુરયા કુરઙ્ગમ્ ।
મનસ્તદાયમ્ય ધિયાસ્તસઙ્ગં વિભું ભજધ્વં ગિરિજાભુજઙ્ગમ્ ॥ ૩॥

ભિત્વાલિકં સુભ્રુકુટીવિભઙ્ગં યસ્યાગ્નિરુધ્દ્રભસાદનઙ્ગમ્ ।
દદાહ તં મોહતમઃપતઙ્ગં વિભું ભજધ્વં ગિરિજાભુજઙ્ગમ્ ॥ ૪॥

વહન્તમુદ્દામભુજઙ્ગમઙ્ગં જટાભરં નિર્ભરનાકગઙ્ગમ્ ।
વિલોચનં ચાગ્નિશિખાવિષઙ્ગં વિભું ભજધ્વં ગિરિજાભુજઙ્ગમ્ ॥ ૫॥

ભવબન્ધબદ્ધવિધુરોદ્ધરણં ફણિમણ્ડલજ્વલદલઙ્કરણમ્ ।
વ્રજત ક્ષ્માધરદરીશરણં શરણં તુષારકિરણાભરણમ્ ॥ ૬॥

કૃતાઘસ્મરનિરાકરણં કટુકાલકૂટકબલીકરણમ્ ।
ભજત પ્રપન્નજનતાશરણં શરણં તુષારકિરણાભરણમ્ ॥ ૭॥

મરુમેદિનીરચિતસઞ્ચરણં ત્રિદશેન્દ્રશેખરનતચરણમ્ ।
વ્રજત ત્રિદુઃખહરસ્મરણં શરણં તુષારકિરણાભરણમ્ ॥ ૮॥

પ્રણતજનજિતજરામરણં રચયન્તમાત્મભવનિસ્સરણમ્ ।
વ્રજતાહિતત્રિપુરસંહરણં શરણં તુષારકિરણાભરણમ્ ॥ ૯॥

અવધૂતમોહતિમિરાવરણં કરિકૃત્તકલ્પિતપરાવરણમ્ ।
વ્રજત પ્રકલ્પિતપુરેશરણં શરણં તુષારકિરણાભરણમ્ ॥ ૧૦॥

તરુણતમાલમલીમસતાલં જ્વલનશિખાપટલોજ્જ્વલભાલમ્ ।
શિરસિ લસત્પરમેષ્ઠિકપાલં શ્રયત વિભું હતકલ્મષજાલમ્ ॥ ૧૧॥

નરમુખકલ્પિતશેખરમાલં નતજનજૃમ્ભિતમોહતમાલમ્ ।
નયનશિખાશતશાતિતકાલં શ્રયત વિભું હતકલ્મષજાલમ્ ॥ ૧૨॥

વિષમવિષાગ્નિશિખાવિકરાલં ફણિપતિહારમતીવ વિશાલમ્ ।
ગલભુવિબિભ્રદ્ગરલકરાલં શ્રયત વિભું હતકલ્મષજાલમ્ ॥ ૧૩॥

વિદલયિતું યમૃતે ભવનાલં ત્રિભુવનસીમનિ કશ્ચન નાલમ્ ।
તમમલમાનસવાસમરાલં શ્રયત વિભું હતકલ્મષજાલમ્ ॥ ૧૪॥

કમલપરાગપિશઙ્ગજટાલં જલધિસમર્પણતર્પિતબાલમ્ ।
ભવભટભઙ્ગમહાકરવાલં શ્રયત વિભું હતકલ્મષજાલમ્ ॥ ૧૫॥

અધિકસ્મરભસ્મરજોધવલં નતલોકસમર્પિતબોધબલમ્ ।
ધ્વજધામવિરાજિમહાધવલં ભજત પ્રભુમદ્રિસુતાધવલમ્ ॥ ૧૬॥

પ્રભયા પરિભૂતદલદ્ધવલં ગલમઙ્ગદરત્નશિખાશબલમ્ ।
દધતં વિષક્લૃપ્તમહાકબલં  ભજત પ્રભુમદ્રિસુતાધવલમ્ ॥ ૧૭॥

શિખરં ધુનદીલહરીતરલં ગલમૂલમુપોઢમહાગરલમ્ ।
દધતં હૃદયં ચ સુધાસરલં ભજત પ્રભુમદ્રિસુતાધવલમ્ ॥ ૧૮॥

અપનીતકુકર્મકલઙ્કમલં નતલોકવિતીર્ણમહાઘમલમ્ ।
દદતં શુભસિદ્ધિવિપાકમલં ભજત પ્રભુમદ્રિસુતાધવલમ્ ॥ ૧૯॥

દધતં વચનં ઘનહાસકલં નમતાં દલયન્તમઘં સકલમ્ ।
ભજતાં ચ દિશન્તમભીષ્ટફલં ભજત પ્રભુમદ્રિસુતાધવલમ્ ॥ ૨૦॥

ઇતિ નતોપદેશસ્તોત્રં સમાપ્તમ્ ॥

Proofread by PSA Easwaran

---

*natopadeshastotram*

pdf was typeset on February 3, 2023

Please send corrections to *sanskrit@cheerful.com*